उ॰ पुरुषो मनोमयः। अमृतो हिरण्मयः। अन्तरेण तालुके। य एष स्तन इवावलम्बते। सेन्द्र-योनिः। यत्राऽसौ केशान्तो विवर्त्तते। व्यपोह्य-शीर्षकपाले। भूरित्यग्नौ प्रतितिष्ठति। भुव

भा॰ कनाडीसुषिर ऊर्द्धनालाधोमुखो विशस्यमाने पशौ प्रसिद्ध उपलभ्यते। तस्यान्तर्य्य एष आकाशः प्रसिद्ध एव करकाकाशवत्। तस्मिन् सोऽयं पुरुषः पुरि शयनात्पूर्णा वा भूरादयो लोका येनेति पुरुषो मनोमयः। मनो विज्ञानं। मनुतेर्ज्ञानकर्म्मणस्तन्मयस्तदुपलभ्यत्वात्। मनुतेऽनेनेति वा मनोऽन्तःकरणं तदभिमानी तन्मयस्तल्लिङ्गो वा। अमृतोऽमरणधर्म्मा। हिरण्मयो ज्योतिर्म्मयस्तस्यैवंलक्ष-णस्य हृदयाकाशे साचात्कृतस्य विदुष आत्मभूतस्येन्द्रस्य स्व-रूपप्रतिपत्तये मार्गोऽभिधीयते। हृदयादूर्द्धं प्रवृत्ता सुषुम्ना नाम नाडी योगशास्त्रेषु च प्रसिद्धा। सा चाऽन्तरेण मध्ये प्रसिद्धे तालुके तालुकयोर्गता। यश्चैष तालुकयोर्मध्ये स्तन इवावलम्बते मांसखण्डस्तस्य चान्तरेणेत्येतत्। यत्र केशान्तः केशानामन्तो मूलं विवर्त्तते विभागेन वर्त्तते मूर्द्धप्रदेश इत्यर्थः। तं देशं प्राप्य तत्र विनिःसृता व्यपोह्य विभज्य विदार्य्य शीर्षकपाले शिरःकपाले विनिर्गता या

आ॰ हिरण्यनाडी योगशास्त्रे बोध्यते *। तस्य शास्त्रे करणाधिष्ठातृत्वेन

* हिरण्यगर्भोऽनुमीयत इति पत्तकान्तरपाठः।



HARVARD COLLEGE LIBRARY

Digitized by Google

ऐ॰ उ॰ स इमाँल्लोकानसृजत

ऐ॰ भा॰ यथेह बुद्धिमांस्तक्षादिरेवम्प्रकारान् प्रासादादीन् स्रक्ष्ये इतीक्षित्वेक्षानन्तरं प्रासादादीन् सृजति तद्वत्। ननु सोपादानस्तक्षादिः प्रासादादीन् सृजतीति युक्तं निरुपादानस्त्वात्मा कथं लोकान् सृजति इति। नाऽयं दोषः। सलिलफेनस्थानीये अरूपेऽव्याकृते आत्मैकशब्दवाच्ये व्याकृतफेनस्थानीयस्य जगत उपादानभूते सम्भवः। तस्मा-

आ॰ अत्रेक्षणपूर्व्वकसृष्ट्युक्तेः प्रयोजनं स्रष्टुश्चेतनत्वसिद्धिरेवेत्यभिप्रेत्य तथाविधस्य तक्ष्णश्चेतनत्वमुदाहरति। यथेति॥ नन्वीक्षितुस्तक्ष्णादेर्दार्वाद्युपादानकारणसहितत्वात्प्रासादादेः स्रष्टृत्वं युक्तं। इहात्मा वा इदमेक एवेत्युक्तस्याद्वितीयत्वेनोपादानकारणान्तराभावात् स्रष्टृत्वं न युक्तमिति शङ्कते। नन्विति॥ न च बहु स्यां प्रजायेयेति तदात्मानं स्वयमकुरुतेति श्रुत्याऽऽत्मन एवोपादानत्वान्नोपादानान्तरापेक्षेति वाच्यं। वियदादेर्व्यावहारिकत्वेन घटादिवत्परिणामत्वात्तस्य परिणाम्युपादानं वक्तव्यं। न चात्मा तथा भवितुमर्हति तस्य निरवयवत्वेनापरिणामित्वादिति भावः॥ अत्र वियदादेः परिणामित्वमङ्गीकृत्य तत्रानभिव्यक्तनामरूपावस्थं वीजभूतमव्याकृतं तद्धेदं तर्ह्यव्याकृतमासीत्तम आसीत् मायान्तु प्रकृतिं विद्यादित्यादिश्रुतिसिद्धं परिणाम्युपादानमस्तीत्याह। नायमिति॥ आत्मभूत इत्यनेनानभिव्यक्तनामरूपशब्दिताव्याकृतस्यात्मन्यध्यस्तत्वेन परिणममानाविद्याधिष्ठानत्वेनात्मनो विवर्त्तोपादानत्वं तयोरात्ममात्रत्वेन मृषात्वात्॥ आत्मनो द्वितीयत्वञ्च न विरुध्यत इति दर्शयति। नामरूप इति॥ तदाश्रयमव्याकृतमित्यर्थः। इदानीं घटादिष्वपि विवर्त्तत एव परिणामो नामविवर्त्तादन्यो नास्त्येव विवर्त्त इति परिणाम इति च पर्याय इत्यारम्भणाधिकरणन्यायेन विवर्त्ततया सिद्धेर्विकारेऽप्यात्मकृतेः परिणामादिति सूत्रकारेण परिणामशब्दप्रयोगाच्च सिद्धं तत्र

ए॰उ॰ तथा । तस्मादेनां न हिनस्ति सास्यैतमात्मानमत्र गतं भावयति ॥ २ ॥

सा भावयित्री भावयितव्या भवति तं स्त्रीगर्भं

---

ऐ॰भा॰ रेकतां यथा पितुरेवं गच्छति प्राप्नोति यथा स्वमङ्गं स्तनादि तथा तद्वदेव। तस्माद्धेतोरेनां मातरं स गर्भो न हिनस्ति पिटकादिवत्। यस्मात् स्तनादि स्वाङ्गवदात्मभूयं गतं तस्मान्न हिनस्ति न बाधत इत्यर्थः। सा ऽन्तर्वत्नी एवमस्य भर्त्तुरात्मानमन्नात्मन उदरे प्रविष्टं गतं बुध्वा भावयति वर्द्धयति परिपालयति गर्भविरुद्धाशनादिपरिहारमनुकूलाशनाद्युपयोगञ्च कुर्व्वन्ती ॥ २ ॥

सा भावयित्री वर्द्धयित्री भर्त्तुरात्मनो गर्भभूतस्य भावयितव्या रक्षयितव्या च भर्त्त्रा भवति। न ह्युपकारप्रत्युपकारमन्तरेण लोके कस्यचित् केनचित् सम्बन्ध उपपद्यते।

---

आ॰ यस्यामिति ॥ पिटकाः व्रणरूपग्रन्थिविशेषाः। तद्वन्न हिनस्तीति व्यतिरेकेण दृष्टान्तः ॥ अक्षरार्थमुक्त्वा पिण्डितार्थमाह। यस्मादिति ॥ अत्र प्रसङ्गात् स्त्रियाः सावधानेन गर्भरक्षणं कर्त्तव्यमिति विधत्ते। सेति ॥ भावयति भावयेदित्यर्थः ॥ पालनोपायमाह। गर्भविरुद्धेति ॥ २ ॥

तस्याप्यन्तर्व्वत्नी रक्षणं विधत्ते। सा भावयित्रीति ॥ चशब्दस्य सेत्यत्र सम्बन्धः। सापीत्यर्थः ॥ तस्या भावयितव्यत्वे हेतुमाह। न हीति ॥ स्त्रीपुरुषयोः परस्परोपकारकत्वमुक्त्वा तयोः पुत्रसाध्यवक्ष्यमाणपुण्यकर्म्मप्रतिनिधिरूपप्रत्युपकारसिद्ध्यर्थं पुत्रं प्रत्युपकारकत्वमाह। तमिति ॥ अग्र इत्यत्रैवशब्दो जन्मनः पूर्व्वकालं वदति। द्वितीयो जननकालमधिशब्दोऽनन्तरकालं वदतीति व्या-

Digitized by Google

